# आचार्यद्वितीयवर्षम्

## प्रथमपत्रम्– नव्यन्यायः

## शैक्षिकनिष्पत्तिः

**ग्रन्थः – व्युत्पत्तिवादः (आदितः प्रथमखण्डान्तो भागः),**

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

❖शाब्दबोधे आकाङ्क्षाप्रयोज्यसंसर्गस्य भेदाभेदरूपेण द्वैविध्यम्, अभेदान्वयप्रयोजकाकाङ्क्षास्वरूपं, समानविभक्तिकत्वपरिष्कारं, "वेदाः प्रमाणम्" इति प्रयोगस्य समर्थनं, "सम्पन्नो व्रीहिः" इत्यत्र वाक्यार्थनिरूपणे पक्षत्रयं, सजातीयद्वितीयरहितत्वरूपम् एकत्वं च ज्ञातुं शक्नुवन्ति।

❖समासव्याससाधारणाकाङ्क्षा इति पक्षस्य परिशीलनं, विशेषणविभक्तेः अभेदार्थकत्वपक्षं, अभेदस्वरूपनिर्वचनं, विशेषणविभक्तेः विशेषणतावच्छेदकधर्मार्थकत्वपक्षपरिशीलनं, "प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ" इति नियमतात्पर्यं चावगन्तुं शक्नुवन्ति।

❖"क्रियाविशेषणानां कर्मत्वम्" इति नियमं, घञन्तस्य पाकादिपदस्य पाकादौ शक्तिरितिमतं, क्रियाविशेषणवाचकपदोत्तरम् एकवचनस्यैव साधुत्वं च विज्ञातुं शक्नुवन्ति।

❖"अभेदान्वयबोधः विरूपोपस्थितयोरेव इति नियमं, "घटो घटः" इत्यादौ अभेदान्वयबोधनिरासक्रमं, योग्यताज्ञानशाब्दबोधयोः विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावं चावगन्तुं शक्नुवन्ति।

❖भेदान्वयबोधस्थलानां द्वैविध्यं, रूपकस्थले मतभेदेन बोधोपपादनं, "राजपुरुषः" इत्यादि समासस्थले पूर्वपदलक्षणासमर्थनं, द्वितीयादिविभक्त्यर्थस्य संसर्गत्वमेवेति पक्षस्य परिशीलनं च ज्ञातुं शक्नुवन्ति।

❖"जानाति" इत्यादौ आख्यातार्थविचारे मणिकार-दीधितिकारमतभेदं, प्रथमाविभक्तेः संख्यैव अर्थः इति सिद्धन्तं, संख्यायाः प्रकृत्यर्थत्वम् इति वैयाकरणमतपरिशीलनं चावगन्तुं शक्नुवन्ति।

❖"प्रादीनां द्योतकत्वमेव न तु वाचकत्वम्" इति सिद्धान्तं, विभक्त्यर्थसंख्यायाः प्रकृत्यर्थे पर्याप्तिसम्बन्धेन अन्वयविधानं, पर्याप्तिसंसर्गस्य स्वीकारावश्यकताम्, एकवाक्यतापरिष्कारं च ज्ञातुं शक्नुवन्ति।

❖शतादिशब्दार्थतदन्वयविचारे मतभेदं, आख्यातैकवचनस्य संख्यार्थकत्वपरिशीलनं चावगन्तुं शक्नुवन्ति।

❖धातोः व्यापारमात्रार्थकत्वमिति प्राचीनमतं, फलावच्छिन्नव्यापारार्थकमिति नव्यमतं, द्विकर्मकधातुस्थले शाब्दबोधवर्णनप्रकारं, गतिबुद्धीत्यादिसूत्रोदाहरणे शाब्दबोधवर्णनप्रकारं, सविषयकार्थकधातुसमभिव्याहारस्थले द्वितीयायाः विषयतार्थकत्वं चावगन्तुं शक्नुवन्ति।

**********